# .. shrI nRisi.nhAShTottarashatanAmAvaliH 2 ..
# ॥ श्री नृसिंहाष्टोत्तरशतनामावलिः २ ॥

ॐ नारसिंहाय नमः ।
ॐ तीक्ष्णदंष्ट्राय नमः ।
ॐ वज्रनखाय नमः ।
ॐ विष्णवे नमः ।
ॐ जिष्णवे नमः ।५।
ॐ सर्वबीजाय नमः ।
ॐ सत्याय नमः ।
ॐ सर्वचैतन्यरूपिणे नमः ।
ॐ सर्वाधाराय नमः ।
ॐ सर्वस्मै नमः ।१०।
ॐ सर्वगाय नमः ।
ॐ विश्वस्मै नमः ।
ॐ विश्ववन्द्याय नमः ।
ॐ विरिञ्चिजनकाय नमः ।
ॐ वागीश्वराय नमः ।
ॐ वेद्याय नमः ।
ॐ वेधसे नमः ।
ॐ वेदमौलये नमः ।
ॐ रुद्राय नमः ।
ॐ भद्राय नमः ।२०।
ॐ मङ्गलाय नमः ।
ॐ महात्मने नमः ।
ॐ कारणाय नमः ।
ॐ तुरीयाय नमः ।
ॐ शिवाय नमः ।
ॐ परमात्मने नमः ।
ॐ हिरण्यकशिपु-प्राणहरणाय नमः ।
ॐ प्रह्लाद-ध्येयमानाय नमः ।
ॐ प्रह्लादार्तिहराय नमः ।
ॐ प्रह्लाद-स्थिरसाम्राज्य-दायकाय नमः ।३०।
ॐ दैत्य-वक्षोविदलन-व्यग्र-वज्रनखाय नमः ।
ॐ आन्त्रमाला-विभूषणाय नमः ।
ॐ महारौद्राय नमः ।
ॐ उग्रय नमः ।
ॐ वीराय नमः ।
ॐ ज्वलते नमः ।
ॐ भीषणाय नमः ।
ॐ सर्वतोमुख-दुर्वार-तेजोविक्रम-शालिने नमः ।
ॐ नरसिंहाय नमः ।
ॐ रौद्राय नमः ।४०
ॐ मृत्युमृत्यवे नमः ।
ॐ मत्स्याद्यनन्त-कल्याण-लीलावैभव-कारिणे नमः ।
ॐ व्यूह-चतुष्काय नमः ।
ॐ दिव्यार्चारूप-धारिणे नमः ।
ॐ परस्मै नमः ।
ॐ पाञ्चजन्यादि-पञ्च-दिव्यायुधाय नमः ।
ॐ त्रिसाम्ने नमः ।
ॐ त्रिधाम्ने नमः ।
ॐ त्रिगुणातीत-मूर्तये नमः ।
ॐ योगरूढाय नमः ।५०।
ॐ लक्ष्याय नमः ।
ॐ मायातीताय नमः ।
ॐ मायिने नमः ।
ॐ मन्त्रराजाय नमः ।
ॐ दुर्दोष-शमनाय नमः ।
ॐ इष्टदाय नमः ।
ॐ किरीट-हारादि-दिव्याभरण-धारिणे नमः ।
ॐ सर्वालङ्कार-युक्ताय नमः ।
ॐ आकण्ठ-हरिरूपाय नमः ।
ॐ लक्ष्मीलोलाय नमः ।६०।
ॐ आकण्ठ-नररूपिणे नमः ।
ॐ चित्राय नमः ।
ॐ चित्ररूपाय नमः ।
ॐ जगच्चित्रकराय नमः ।
ॐ सर्व-वेदान्तसिद्धान्त-सारसत्तमयाय नमः ।
ॐ सर्वमन्त्राधिदेवाय नमः ।
ॐ स्तम्भ-डिम्भाय नमः ।
ॐ शंभवे नमः ।
ॐ अनन्त-कल्याणगुण-रत्नाकराय नमः ।
ॐ भगवच्छब्द-वाच्याय नमः ।७०।
ॐ वागतीताय नमः ।
ॐ कालरूपाय नमः ।
ॐ कल्याय नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ अघहारिणे नमः ।

ॐ गुरवे नमः ।
ॐ सर्वसत्कर्म-फलदाय नमः ।
ॐ अशेष-दोष-दूराय नमः ।
ॐ सुवर्णाय नमः ।
ॐ आत्मदर्शिने नमः । ८०
ॐ वैकुण्ठपद-नाथाय नमः ।
ॐ नारायणाय नमः ।
ॐ केशवादि-चतुर्विंशत्यवतार-स्वरूपिणे नमः ।
ॐ जीवेशायनमः ।
ॐ स्वतन्त्राय नमः ।
ॐ मृगेन्द्राय नमः ।
ॐ ब्रह्मराक्षस-भूतादि-नानाभय-विनाशिने नमः ।
ॐ अखण्डानन्द-रूपाअय नमः ।
ॐ मन्त्रमूर्तये नमः ।
ॐ सिद्धये नमः । ९० ।
ॐ सिद्धबीजाय नमः ।
ॐ सर्वदेवात्मकाय नमः ।
ॐ सर्वप्रपञ्च-जन्मादि-निमित्ताय नमः ।
ॐ शङ्कराय नमः ।
ॐ शरण्याय नमः ।
ॐ शास्त्रयोनये नमः ।
ॐ ज्योतिषे नमः ।
ॐ जीवरूपाय नमः ।
ॐ निर्भेदाय नमः ।
ॐ नित्यभगवताराध्य-सत्य-लीलाविभूतये नमः । १०० ।
ॐ नरकेसरिताव्यक्त-सदसन्मय-मूर्तये नमः ।
ॐ सत्तामात्र-रूपाय नमः ।
ॐ स्वाधिष्ठानात्मकाय नमः ।
ॐ संशयग्रन्थि-भेदाय नमः ।
ॐ सम्यज्ज्ञान-स्वरूपिणे नमः । १०५ ।
ॐ सर्वोत्तमेशाय नमः ।
ॐ पुराण-पुरुषाय नमः ।
ॐ पुरुषोत्तम-रूपाय नमः ॥ १०८ ॥
॥ इति श्रीनृसिंहाष्टोत्तरशतनामावलिः संपूर्णा॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated July 12, 2008